## प्रतेरंश्वादयस्तत्पुरुषे। (१९३/३०२७)

प्रतेरंश्वादयस्तत्पुरुषे समासेऽन्तोदात्ताः भवन्ति। प्रतिगतः अंशुः प्रत्यंशुः। प्रतिजनः। प्रतिराजा। [1]राजशब्दः समासान्तस्यानित्यत्वाद् यदा टज् नास्ति तदा प्रयोजयति। तस्मिन् हि सति चित्त्वादेवान्तोदात्तत्वं सिद्धम्। तत्पुरुषे इति किम्? प्रतिगताः अंशवः अस्य प्रत्यंशुः अयमुष्ट्रः।

अंशु। जन। राजन्। उष्ट्र। खेटक। [2]अजिर। आर्द्रा। श्रवण। कृत्तिका। अर्ध। पुर॥

## उपाद्द्व्यजजिनमगौरादयः। (१९४/३०२८)

उपादुत्तरं द्व्यच् अजिनं चान्तोदात्तं भवति तत्पुरुषे समासे [3]गौरादीन् वर्जयित्वा। उपगतो देवम् उपदेवः। उपसोमः। उपेन्द्रः। उपहोडः। अजिन – उपाजिनम्। अगौरादयः इति किम्? उपगौरः। [4]उपतैषः। तत्पुरुषे इत्येव, उपगतः सोमोऽस्य उपसोमः।

गौर। तैष। नैष। तैट। लट। लोट। जिह्वा। कृष्णा। कन्या। गुड। कल्य। पाद। गौरादिः॥

## सोरवक्षेपणे। (१९५/३०२९)

सुशब्दात् परमुत्तरपदं तत्पुरुषे समासेऽन्तोदात्तं भवति अवक्षेपणे गम्यमाने। अवक्षेपणं निन्दा। इह खलु इदानीं सुस्थण्डिले [5]सुस्फिगाभ्यां सुप्रत्यवसितः। सुशब्दोऽत्र पूजायामेव। वाक्यार्थस्तु अवक्षेपणमसूयया, तथाभिधानात्। सोः इति किम्? कुब्राह्मणः। अवक्षेपणे इति किम्? शोभनेषु तृणेषु सुतृणेषु॥

## विभाषोत्पुच्छे। (१९६/३०३०)

उत्पुच्छशब्दे तत्पुरुषे [6]विभाषा अन्त उदात्तो भवति। उत्क्रान्तः पुच्छात् उत्पुच्छः, उत्पुच्छः। यदा तु पुच्छमुदस्यति उत्पुच्छयति, उत्पुच्छयतेरच् उत्पुच्छः, तदा थाथादिसूत्रेण (६.२.१४४/३८७८) नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् इति सेयमुभयत्र विभाषा भवति। तत्पुरुष इत्येव, उदस्तं पुच्छमस्य उत्पुच्छः॥

## द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ। (१९७/३०३१)

द्वि त्रि इत्येताभ्यामुत्तरेषु पाद् दत् मूर्धन् इत्येतेषूत्तरपदेषु यो बहुव्रीहिः, तत्र विभाषा अन्तः उदात्तो भवति। द्वौ पादो अस्य द्विपात् (तै. सं. २.६.८.३), द्विपात्। त्रिपात्, त्रिपात्। द्विदन्, द्विदन्। त्रिदन्, त्रिदन्। द्विमूर्धा, द्विमूर्धा। त्रिमूर्धा, त्रिमूर्धा। पाद् इति कृताकारलोपः पादशब्दो गृह्यते। दत् इति कृतदद्‌ादेशो दन्तशब्दः। मूर्धन् इति त्वकृतसमासान्तो नान्त एव मूर्धन्शब्दः। तस्य एतत्प्रयोजनम् असत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकम् अनित्यः समासान्तो भवति इति। यदाऽपि समासान्तः क्रियते तदापि बहुव्रीहेः कार्यित्वात् तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येव। द्विमूर्धः। त्रिमूर्धः। द्वित्रिभ्याम् इति किम्? [7]कल्याणमूर्धा। पादादिषु [8]इति किम्? द्विहस्तम्। बहुव्रीहौ इति किम्? द्वयोर्मूर्धा द्विमूर्धा॥

---

1. राजन्शब्दः फ. 2. अजिन फ.ह. 3. गौरान्तं फ. 4. उपनैशः ब, उपनैषः ड. फ. 5. सुक्रियाभ्याम् क. 6. समासे इत्यधिकम् फ.ह. 7. कल्याणमूर्धा नास्ति फ. 8. इति नास्ति फ.